# શ્રીગોપાલરાજસ્તોત્રમ્

Shri Gopalarajastotram

sanskritdocuments.org

March 16, 2019

# Shri Gopalarajastotram

# શ્રીગોપાલરાજસ્તોત્રમ્

## Sanskrit Document Information

Text title : gopAlarAjastotram

File name : gopAlarAjastotram.itx

Category : vishhnu, krishna, raghunAthadAsagosvAmin, stavAvalI

Location : doc_vishhnu

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From Collected prayers by Raghunatha Dasa Goswami Stavavali

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 16, 2019

*sanskritdocuments.org*

# શ્રીગોપાલરાજસ્તોત્રમ્

વપુરતુલતમાલસ્ફીતબાહૂરુશાખો
    પરિધૃતગિરિવિર્યસ્વર્ણવર્ણૈકગુચ્છઃ ।
કટિકૃતપરહસ્તારક્તશાખાગ્રહૃદ્ધઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧॥

રુચિરદૃગભિધાને પઙ્કજે ફુલ્લયન્તં
    સુભગવદનગાત્રં ચિત્રચન્દ્રં દધાનઃ ।
વિલસદધરબિમ્બઘ્રાયિનાસાશુકોષ્ઠઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૨॥

ચલકુટિલતરભ્રૂકર્મુકાન્તર્દૃગન્ત
    ક્રમણનિશિતબાણં શીઘ્રયાનં દધાનઃ ।
દવયિતુમિવ રાધાધૈર્યપારીન્દ્રવર્યં
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૩॥

અસુલભમિહ રાધાવક્ત્રચુમ્બં વિજાનન્-
    નિવ વિલસિતુમેતા છાયયાપિ પ્રદૂરાત્ ।
મુકુરયુગલમચ્છં ગણ્ડદમ્ભેન બિભ્ર-
    ત્પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૪॥

રુચિનિકરવિરાજદ્દાડિમીપક્વબીજ
    પ્રકરવિજયિદન્તશ્રેણિસૌરભ્યવાતૈઃ ।
રચિતયુવતિચેતઃકીરજિહ્વાતિલૌલ્યઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૫॥

વચનમધુરસાનાં પાયનૈર્ગોપરામા
    કુલમુરુધૃતધામાપ્યુન્મદીકૃત્ય કામમ્ ।
અભિમતરતિરત્નાન્યાદદાનસ્તતો દ્રાક્
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૬॥

કુવલયનિભભાલે કૌઙ્કુમદ્રાવપુણ્ડ્રં
    દધદિવ ઘનશણ્ડે નિશ્ચલાચઞ્ચલાગ્રમ્ ।
રચયિતુમિવ સાધ્વીકીર્તિમુગ્ધાલિભીતિં
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૭॥

શ્રવણમદનરજ્જૂ સજ્જયલ્લજ્જિરાધા
    નયનચલચકોરૌ બન્ધુમુક્તઃ કિશોરૌ ।
કૃતમકરવતંસસ્નિગ્ધચન્દ્રાંશુચારઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૮॥

યુવતિકરણરત્નવ્રાતમાચ્છિદ્ય નેત્ર
    ભ્રમણપટુભટૈસ્તં ન્યસ્ય હૃત્સૌધમધ્યે ।
ગરુડમણિકવાટેનોરસાધુષ્ય હૃષ્ટઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૯॥

ત્રિબલિલલિતતુણ્ડસ્યન્દિનાભિહ્રદોદ્ય-
    ત્તનુરુહતતિસર્પીમત્ર બિભ્રાણ ઉગ્રામ્ ।
યુવતિપતિભયાખુગ્રાસનાયેવ સદ્યઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૦॥

મરકતકૃતરમ્ભાગર્વસર્વાઙ્કુશોરુ
    દ્વયમુરુરસધામ પ્રેયસીનાં દધાનઃ ।
સ્ફુરદવિરલપુષ્ટશ્રોણિભારાતિરમ્યઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૧॥

મદનમણિવરાલીસમ્પુટક્ષુલ્લજાનુ
    દ્વયસુલલિતજઙ્ઘામઞ્જુપાદાબ્જયુગ્મઃ ।
વિવિધવસનભૂષાભૂષિતાઙ્ગઃ સુકણ્ઠઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૨॥

કલિતવપુરિવ શ્રીવિટ્ઠલપ્રેમપુઞ્જઃ
    પરિજનપરિચર્યાવર્યપીયૂષપુષ્ટઃ ।
દ્યુતિભરજિતમદ્યન્મન્મથોદ્યત્સમાજઃ
    પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૩॥

વિવિધભજનપુષ્પૈરિષ્ટનામાનિ ગૃહ્ણ-

ન્પુલકિતતનુરિહ શ્રીવિટ્ઠલસ્યોરુસખ્યૈઃ ।
પ્રણયમણિસરં સ્વં હન્ત તસ્મૈ દદાનઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૪॥

ગિરિકુલપતિપટ્ટોલ્લાસિગોપાલરાજ
સ્તુતિવિલસિતપદ્યાન્યુદ્ભટપ્રેમદાનિ ।
નટયતિ રસનાગ્રે શ્રદ્ધયા નિર્ભરં યઃ
સ સપદિ લભતે તત્પ્રેમરત્નં પ્રસાદમ્ ॥ ૧૫॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીગોપાલરાજસ્તોત્રં સમ્પૂર્ણમ્ ।

---

*Shri Gopalarajastotram*
pdf was typeset on March 16, 2019

Please send corrections to *sanskrit@cheerful.com*